तदेकतरे न्यूने पक्षे किञ्चित्प्रक्षिप्य ततः अधिकपक्षात्तावदेव विशोध्य वा न्यूनं पक्षं केनचित्सङ्गुण्य वाधिकं पक्षं तावतैव भक्त्वा समौ कार्य्यौ । ततस्तयोरेकस्य पक्षस्याव्यक्तमन्यपक्षस्याव्यक्ताच्छोध्यम् अव्यक्तवर्गादिकमपि।अन्यपक्षरूपाणि इतरपक्षरूपेभ्यः शोध्यानि। यदि करण्यः सन्ति तदा ता अपि उक्तप्रकारेण शोध्याः। ततोऽव्यक्तराशिशेषेण रूपशेषे भक्ते यल्लभ्यते तदेकस्याव्यक्तस्य मानं व्यक्तं जायते । तेन कल्पितोऽव्यक्तराशिरुत्थाप्यः ॥ यत्रोदाहरणे द्व्यादयोऽव्यक्तराशयोभवन्ति तदा तस्यैकं यावत्तावत्प्रकल्प्य अन्येषां द्व्यादिभिरिष्टैर्गुणितं भक्तं वा इष्टैः रूपैरूनं युतं वा यावत्तावदेव प्रकल्प्यम् ॥ अथ वा एकस्य यावत्तावदन्येषां व्यक्तान्येव मानानि प्रकल्प्यानि । सर्वं विदित्वेति यथा क्रिया निर्वहति तथा बुद्धिमता ज्ञात्वा शेषाणामव्यक्तानि व्यक्तानि वा कल्प्यानीत्यर्थः।उदाहरणम्। एकस्य रूपं त्रिशती षडश्वा अश्वा दशान्यस्य तु तुल्यमूल्याः । ऋणं तथा रूपशतं च तस्य तौ तुल्यवित्तौ च किमश्वमूल्यम् । यदा द्यवित्तस्य दलं द्वियुक्तं तत्तुल्यवित्तोयदि वा द्वितीयः । आद्योधनेन त्रिगुणोऽन्यतोवा पृथक् पृथङ्मे वद वाजिमौल्यम् । अत्राश्वमौल्यमज्ञातं तस्य मानं यावत्तावदेकं प्रकल्पितं या १ तत्र त्रैराशिकं यद्येकस्य यावत्तावन्मूल्यं तदा षसां किमिति न्यासः । १ । या १ । ६ । फलमिच्छागुणं प्रमाणभक्तं लब्धं षसामश्वानाम्मूल्यं या६अत्र रूपशतत्रये प्रक्षिप्ते जातमाद्यस्य धनं या६रू३०० एवं दशानां मौल्यं या १० अत्र रूपशते चर्णगते प्रक्षिप्ते जातं द्वितीयस्य धनं या १० रू १०.० एतौ समधनाविति पक्षौ स्वत एव समौ जातौ समशोधनार्थं न्यासः या ६ रू ३००

या १० रू १०.०

अथ एकाव्यक्तं शोधयेदन्यपक्षादिति आद्यपक्षाव्यक्तेऽन्यपक्षाव्यक्ताच्छोधिते शेषं या ४ । द्वितीयपक्षरूपेषु आद्यपक्षरूपेभ्यः शोधितेषु शेषं रू ४०० अव्यक्तराशिशेषेण या ४ रूपशेषे रू ४०० उद्धृते लब्धमेकस्य यावत्तावतो मानं व्यक्तं १०० यद्येकाश्वस्येदं मौल्यं तदा षसां किमिति त्रैराशिकेन लब्धे षसां मौल्ये ६००रूपकशतत्रययुते९००जातमाद्यस्य धनम्।एवं द्वितीयस्यापि९००"वीजग० एवमनेकवर्गादीनामप्युदाहरणादीनि तत्रैव द्रष्टव्यानि ।

**अव्यक्तमूलप्रभव** पु० अव्यक्तं प्रधानमविद्या वा मूलम् प्रभवत्यस्मात् प्रभवः अपादाने अप् प्रभवोयस्य। संसारवृक्षे ।

**अव्यक्तराग** पु० न व्यक्तोऽल्पव्यक्तोरागोऽरुणिमा । १ईषद्रक्ते अरुणे वर्णे २तद्वति त्रि० ।

**अव्यक्तलिङ्ग** न० अव्यक्तस्य लिङ्गमनुमापकम् । सांख्यमतसिद्धे १महत्तत्त्वादौ । अव्यक्तं लिङ्गमस्य । २अस्पष्टचिह्ने रोगादौ त्रि० । न व्यक्तं दम्भाभावेन गुप्तं लिङ्गमस्य। गुप्ताश्रमयुक्ते ३संन्यासिनि पु० ।

**अव्यङ्ग** स्त्री अवेरङ्गं शृङ्गमिवाङ्गमस्याः । १शूकशिम्ब्याम् । न विकलमङ्गमस्य ६ब० । विकलाङ्गभिन्ने पूर्णे त्रि० ।

**अव्यङ्गाङ्गी** स्त्री अव्यङ्गमविकलं सम्पूर्णमङ्गं यस्याः ङीप् । सम्पूर्णाङ्गयुक्तायां स्त्रियाम् "अव्यङ्गाङ्गीं सौम्यनाम्नीं हंसवारणगामिनीम्" । मनुः ।

**अव्यञ्जन** पु० नास्ति व्यञ्जनं शुभलक्षणं शृङ्गे यस्य। १शृङ्गहीनपशौ, २सुलक्षणशून्ये, ३चिह्नशून्ये च त्रि० ।

**अव्यण्डा** स्त्री न विगतमण्डं वीजमस्याः । शूकशिम्ब्याम् ।

**अव्यतिकर** पु० अभावे न०त० । १संसर्गाभावे न०ब० । २संसर्गशून्ये त्रि० ।

**अव्यतिकीर्ण** त्रि० वि+अति+कॄ-क्त न०त० । असङ्कीर्णे "धाराः प्रसादयितुमव्यतिकीर्णरूपाः" माघः ।

**अव्यथ** पु० न व्यथते पद्भ्यां न सञ्चलति व्यथभयचलनयोः अच् । १सर्पे । २व्यथाशून्ये त्रि० । नास्ति व्यथा यस्याः सेवनेन न०ब० । ३हरितक्याम् ४शुण्ठ्याञ्च स्त्री ।

**अव्यथय** पु० न व्यथयति गन्तारमक्लेशेन गन्तव्यस्थाननयनात् व्यथ-णिच्-बा०श घटा० ह्रस्वः न०त० । अश्वे निरु० ।

**अव्यथा** स्त्री अभावे न०त० । व्यथाभावे ।

**अव्यथि** त्रि० व्यथ-इन् न०त० । व्यथाशून्ये अक्लिष्टे "समुद्रमव्यथिर्जगन्वान्" ऋ०१,११७,१५,। [शून्ये च।

**अव्यथिन्** त्रि०न व्यथते व्यथ-इनि न०त० १निर्भये २व्यथा-

**अव्यथिष** न+व्यथ-टिषच् । १सूर्य्ये २समुद्रे च ३धरायां ४रात्रौ च स्त्री टित्त्वात् ङीप् ।

**अव्यथ्य** त्रि० न+व्यथ-नि० कर्त्तरि यत् । व्यथाशून्ये ।

**अव्यपदेश्य** त्रि० न व्यपदिश्यते अभिलापवाक्येन वि+अप+दिश-ण्यत् न०त०। १कथयितुमशक्ये न्यायमते निर्विकल्पके २ज्ञाने न० तद्धि अतीन्द्रियत्वेन अनुव्यवसायाविषयतया अभिलपितुं न शक्यते । "इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्"[२] गौ०सू० । जात्यादिशून्यतया १निर्द्देश्ये २ब्रह्मणि न० ।

**अव्यपेक्षा** स्त्री विशेषेणापेक्षा व्यपेक्षा अभावे न०त० ।